बुद्धिमानात्मनः कार्यगुरुलाघवं कर्मफलमनुबन्धं देशकालौ च विदित्वा युक्तिदर्शनाद्भिषग्बुभूषुः शास्त्रमेवादितः परीक्षेत। विविधानि हि शास्त्राणि भिषजां प्रचरन्ति लोके; तत्र यन्मन्येत सुमहद्यशस्विधीरपुरुषासेवितमर्थबहुलमाप्तजनपूजितं त्रिविधशिष्यबुद्धिहितमपगतपुनरुक्तदोषमार्षं सुप्रणीतसूत्रभाष्यसंग्रहक्रमं स्वाधारमनवपतितशब्दमकष्टशब्दं पुष्कलाभिधानं क्रमागतार्थमर्थतत्त्वविनिश्चयप्रधानं संगतार्थमसंकुलप्रकरणमाशुप्रबोधकं लक्षणवच्चोदाहरणवच्च, तदभिप्रपद्येत शास्त्रम्। शास्त्रं ह्येवंविधममल इवादित्यस्तमो विधूय प्रकाशयति सर्वम्॥ ३ ॥

# शास्त्रपरीक्षा

बुद्धिमान् पुरुषः स्वकर्मणः काठिन्यं, सारल्यं, क्रियामाण-
कर्मजन्यपरिणामं, तत्परिणामजन्यलाभं स्वयं विचिन्त्य
सर्वप्रथमं शास्त्रपरीक्षां कुर्यात्, उत्तमो वैद्यो भवितुम्।
यतो हि आस्मिन् जगति चिकित्सायाः नैकानि शास्त्राणि
उपलभ्यन्ते, तेषु शास्त्रेषु यत् शास्त्रं प्रति इयं धारणा
भवति यत् इदं महद्यशस्कमस्ति, इदं धीराः पुरुषाः
पठन्ति, प्रयोगं कुर्वन्ति च, आप्तैः उत्तमविचाराः सन्ति, एतस्य
यथार्थवक्तारः सम्मानं कुर्वन्ति, इदम् अल्पोत्तममध्यमबुद्धीनां
कृते लाभप्रदमस्ति, पुनरुक्तदोषरहितमस्ति, ऋषिभिः
निर्मितमस्ति उत्तमरीत्या सूत्र-भाष्य-संग्रहादीनां क्रमोऽस्ति,
सुन्दरं हृदयाह्लादयुक्तम् अस्ति, ग्राम्यशब्दरहितमस्ति,
अस्मिन् कठिनशब्दाः न सन्ति, विषयः पूर्णरूपेण
स्पष्टीकृतः, प्रकरणानां क्रमः विषयानुसारमस्ति आनन्तर्यमप्य
चास्ति, विषयवस्तुनः सारतत्त्वं प्रधानरूपेण निर्णीतम्।
विषयाणां सङ्गतिः क्रमश्च उत्तमोऽस्ति।
प्रकरणानां विषयाः पृथक्-पृथक् सन्ति, अत्र वर्णित
विषयः झटित्येव अर्थबोधं कारयति एतादृशैः
विशेषताभिः सम्पन्नस्य शास्त्रस्य अवश्यमेव अभ्यासः
कर्तव्यः। एतादृशं शास्त्रं जिज्ञासुभ्यः तथैव
विषयान् प्रकाशयति यथा सूर्यः तमोऽपहृत्य सर्वाणि
वस्तूनि प्रकाशयति